विद्या भवन बालिका विद्यापीठ लखीसराय

वर्ग –दशम्  विषय – संस्कृत शिक्षक श्यामउदय सिंह

ता:-२५/०७/२०२० (एन.सी.ई.आर.टी. पर आधारित प्रश्न)

अधोलिखितान् गधांशान् पठित्वा प्रश्नानाम् उत्तराणि लिखत j

प्रात:काल: अतीव मधुर: काल: भवति। यदा स्वच्छे आकाशे सूर्य उदेति तथा अंधकार: दूरे गच्छति। सवश सर्वत्र प्रकाश: एवं प्रकाश: भवति। पक्षिण: यत्र तत्र भ्रमन्ति। मधुरेण स्वरेण मधुरं गीतं गायन्ति। सरोवरेषु कमलानि उद्यानेषु च विभिन्नानि पुष्पाणि विकसन्ति। तेषु भ्रमरा: सानन्दं विचरन्ति। शीतल: वायु: वहति। संपूर्ण वातावरणं सुगन्धमयम् भवति। भ्रमणशीला: प्रसन्ना: जना: उधानेषु भ्रमन्ति।केचन तत्रैव व्यायामं कुर्वन्ति। अनेके बाला: अपि उधानेषु यत्र तत्र धावन्ति क्रीडन्ति च। ते अतिव प्रसन्ना: सन्ति। पशव: अपि प्रसन्ना: भवन्ति। वानरा: वृक्षेषु कूर्दन्ति। कुरकुरा: क्रीडन्ति,हरिण: धावन्ति,विडाला: च दुग्धं पिबन्ति। अधुना सर्वे जना: स्वकार्येषु संलग्ना: भविष्यन्ति।ऐसा सुखदायिनी प्रभातवेला जनान् कर्तव्यस्य पाठं पाठयति। धन्या एषा। प्रभातवेला।

१. एकपदेन उत्तरत-

(क) यदा सूर्य: उदेति तदा दूरे किं गच्छति?

(ख) प्रभातवेला जनान् कस्य पाठं पाठयति?

२ . पूर्णवाक्येन उत्तरत-

(क) बाला उधानेषु किं कुर्वन्ति?

(ख) सरोवरेषु किं भवति?

३. भाषिककार्यम्-

(क) `प्रभातवेला` इति पदस्य किं विशेषणपदम् अत्र प्रयुक्तम्?

(ख) `भविष्यन्ति` इति क्रियापदस्य कर्तृपदं किम् अस्ति?

(ग) `सूर्य: इति कर्तृपदस्य अत्र किं क्रियापदं प्रयुक्तम्?

४. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत।